घटराजः, पुं, (घटेषु राजते इति । यद्वा घटेन मदादिसङ्घटनेन राजते शोभते इत्यर्थः ।) कुम्भः । इति हारावली ॥

घटा, स्त्री, (घट+भावे भिदादित्वात् अङ् ततष्टाप् च ।) करिणां घटना । हस्तिनां युद्धादावेकत्र संघातीकरणम् । इत्यमरः । २ । ८ । १०७ ॥ (यथा, कथासरित्सागरे । १६ । १०६ ।
"तुरङ्गतुरगव्राताः शुभ्रसान्द्रैरिवोर्म्मयः ।
तद्गजेन्द्रघटा वेलावनेषु इवाद्यो ययुः ॥")
घटनम् । गोष्ठी । सभा । इति मेदिनी । टे । १३ ॥ समूहः । यथाह श्रीहर्षः ।
"यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापया ॥"

घटालाबुः, स्त्री, (घटाकारा अलाबुः ।) कुम्भतुम्बी । इति राजनिर्घण्टः ॥

घटिकं, क्ली, (घटेन साहाय्यं विद्यतेऽस्य इति ठन् ।) नितम्बः । इति शब्दचन्द्रिका । (घटेन तरतीति । "नौद्व्यचष्ठन् ।" ४ । ४ । ७ । इति ठन् । घटेन तरणशीले त्रि । पुंसि तु । घटिं वायति वादयति घटीवादनेन समयं ज्ञापयतीति । कै+कः पूर्व्वपदस्य ह्रस्वश्च । घटीवादकः ॥)

घटिका, स्त्री, (पादस्याधो ग्रन्थिघटः घटना विद्यतेऽत्र इति । घट+ठन् ।) पादग्रन्थिः । इति शब्दरत्नावली ॥ (घटयति निर्द्दिशति निरूपयति वा कालांशविशेषं लोकयात्रासम्पादनाय । घट+णिच्+ण्वुल्+टापि अत इत्वञ्च ।) मुहूर्त्तः । इति जटाधरः ॥ यथा, ज्योतिर्विदाभरणे ।
"गुर्व्वक्षराणामुदितं च दस्रा
पलं पलानां घटिका किलैका ॥"
यथा, तिथितत्त्वे रघुनन्दनः । "अत्र घटिका मुहूर्त्तं श्राद्धयोग्यकालानुरोधात् ॥") दण्डः । घड़ी इति भाषा । यथा,—
"चतस्रो घटिकाः प्रातररुणोदय उच्यते ॥"
इति तिथ्यादितत्त्वम् ॥
(घट+स्वल्पार्थे कन् टापि अत इत्वञ्च । क्षुद्रघटः । यथा, पञ्चतन्त्रे । १ । २०३ ।
"एता हसन्ति च रुदन्ति च कार्य्यहेतो-
र्विश्वासयन्ति च परं न च विश्वसन्ति ।
तस्मान्नरेण कुलशीलवता सदैव
नार्य्यः श्मशानघटिका इव वर्ज्जनीयाः ॥")

घटी, स्त्री, (घटते इति घटः । घट+अच् । ततः संज्ञायां जातौ वा ङीष् । यद्वा, घटः कालमानज्ञापकः सच्छिद्रः कुम्भः ज्ञापकतयाऽस्त्यस्या इत्यच् ततो गौरादित्वात् ङीष् ।) दण्डः । इति भूरिप्रयोगः । घड़ी इति भाषा ॥ (यथा, सिद्धान्तशिरोमणौ ।
"गुर्व्वक्षरैः खेन्दुमितैरसुस्तैः
षड्भिः पलं तैर्घटिका खषड्भिः
स्याद् वा घटी षष्टिरहः खरामैः ॥"
स्वल्पार्थे ङीष् ।) क्षुद्रघटः । इति मुग्धबोधम् ॥ (यथा, मार्कण्डेये । १२ । २२ ।
"घटीयन्त्रेषु चैवान्यो बद्धस्तोये यथा घटी ॥")

घटीकारः, पुं, (घटीं करोतीति । कृ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) यद्वा, अघटं घटं करोति यः । कुलालः । इति मुग्धबोधम् ॥

घटीयन्त्रं, क्ली, (घट्याः यन्त्रम् ।) कूपाज्जलोत्तोलनार्थरज्जुसहितघटः । जलतोला कल इति भाषा । तत्पर्य्यायः । उद्घाटनम् २ । इत्यमरः । २ । १० । २७ ॥ (यथा, मार्कण्डेयपुराणे । १२ । २० ।
"तान्येव तत्र चक्राणि घटीयन्त्राणि चान्यतः ॥"
घटी क्षुद्रघटस्तदंशस्तत्साद्वाकारं यन्त्रम् । यद्वा घट्याः दण्डरूपकालस्य ज्ञापकं यन्त्रम् । कालपरिमाणज्ञापको यन्त्रविशेषः । घड़ी इति ख्यातः ॥ सूर्य्यसिद्धान्ते कालमानज्ञापकयन्त्राणि बहुविधान्युक्तानि । तत्र शङ्कुयष्ट्यादिकं दिवाकालमानज्ञापकमुक्तवान् । घटीयन्त्रादिकन्तु अहर्निशं कालज्ञानसाधनमिति घटीयन्त्रादिकं सूर्य्यसिद्धान्ते रङ्गनाथेन विस्तीर्य्य प्रदर्शितम् । यथा,—
"अथ घटीयन्त्रादिभिरभिमतकारियन्त्रैर्वा सर्व्वोपजीव्यं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति ॥"
"तोययन्त्रकपालाद्यैर्मयूरनरवानरैः ।
ससूत्ररेणुगर्भैश्च सम्यक् कालं प्रसाधयेत् ॥"
इति सूर्य्यसिद्धान्तः ॥
अत्र रङ्गनाथकृतटीका यथा,—
"जलयन्त्रञ्च तत् कपालञ्च कपालाख्यं जलयन्त्रं वक्ष्यमाणं तदाद्यं प्रथमं येषां तैर्यन्त्रैर्वालुकायन्त्रप्रभृतिभिः सापेक्षघटीयन्त्रैर्मयूरनरवानरैः । मयूराख्यं स्वयंवहयन्त्रं निरपेक्षं नरयन्त्रं शङ्क्वाख्यं छायायन्त्रं पूर्व्वोद्दिष्टं वानरयन्त्रं स्वयंवहं निरपेक्षमेतैः ससूत्ररेणुगर्भैः सूत्रसहिता रेणवो धूलयो गर्भे मध्ये येषां तैः सूत्रप्रोताः षष्टिसंख्यका रुद्राक्षिका मयूरोदरस्था मुखात् घटिकान्तरेण स्वत एव निःसरन्तीति लोकप्रसिद्धा तादृशैर्यन्त्रैरित्यर्थः । यद्वा सूत्राकारेण रेणवः सिकतांशा गर्भे उदरे यस्य तादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम् । तेन सहितैर्मयूरादियन्त्रैर्मयूराद्युक्तयन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः । चकारस्तोययन्त्रकपालाद्यैरित्यनेन समुच्चयार्थकः । कालं दिनगतादिरूपं सम्यक् सूक्ष्मं प्रसाधयेत् । प्रकर्षेण सूक्ष्मत्वेनातिसूक्ष्मत्वेनेत्यर्थः । जानीयादित्यर्थः ॥ * ॥ ननु मयूरादिस्वयंवहयन्त्राणि कथं साध्यानीत्यतस्तत्साधनप्रकारा बहवो दुर्गमाश्च सन्तीत्याह ॥"
"पारदारामुसूत्राणि शुल्बतैलजलानि च ।
बीजानि पांशवस्तेषु प्रयोगास्तेऽपि दुर्लभाः ॥"
अत्र रङ्गनाथकृतटीका यथा,—
"तेषु मयूरादियन्त्रेषु स्वयंवहार्थमेते प्रयोगाः प्रकर्षेण योग्याः । प्रकर्षस्तु यावदभिमतसिद्धेः । एते क इत्यत आह । पारदारामुसूत्राणीति पारदयुक्ता आराः । यथा सिद्धान्तशिरोमणौ ।
लघु काष्ठजसमचक्रे समसुषिराराः समान्तरा नेम्याम् ।
किञ्चिद्वक्रा योज्याः सुषिरस्यार्द्धं पृथक् तासाम् ॥
रसपूर्णं तच्चक्रं द्व्याधाराक्षस्थितं स्वयं भ्रमति ॥
अम्बु जलस्य प्रयोगः । सूत्राणि सूत्रसाधनप्रयोगः । शुल्वं शिल्पनैपुण्यम् । तैलजलानि तैलयुक्तजलस्य प्रयोगः । चकारात् तयोः पृथक् प्रयोगोऽपि । यथा च सिद्धान्तशिरोमणौ ।
उत्कीर्य्यनेमिमथवा परितो मदनेन संलग्नम् ।
तदुपरि तालदलाद्यं कृत्वा सुषिरे रसं क्षिपेत् तावत् ॥
यावदन्यैकपार्श्वे क्षिप्तजलं नान्यतो याति ।
मिहितच्छिद्रं तदतश्चक्रं भ्रमति स्वयं जलाकृष्टम् ॥
ताम्रादिमयस्याङ्कुशरूपनलस्याम्बुपूर्णस्य ।
एकं कुण्डजलान्तर्द्वितीयमग्रं त्वधोमुखं च बहिः ॥
युगपन्मुक्तं चेत् कं नलेन कुण्डाद्बहिः पतति ।
नेम्यां बद्धा घटिकाश्चक्रं जलयन्त्रवत् तथा धार्य्यम् ॥
नलकप्रच्युतसलिलं पतति यथा तद्घटीमध्ये ।
भ्रमति ततस्तत् सततं पूर्णघटीभिः समाकृष्टम् ॥
चक्रच्युतं तदुदकं कुण्डे याति प्रणालिकया ॥
बीजानि केवलं तृणबीजप्रयोगः । पांसवो धूलिप्रयोगास्तैर्युक्ताः प्रयोगाः । अपिशब्दात् प्रयोगेषु सुगमतरा इत्यर्थः । दुर्लभा असाधारणत्वेन मनुष्यैः कर्त्तुमशक्या इत्यर्थः । अन्यथा प्रतिगृहं स्वयंवहानां प्राचुर्य्यापत्तेः । इयं स्वयंवहविद्या समुद्रान्तर्निवासिजनैः फिरङ्गाख्यैः सम्यगभ्यस्तेति । कुहकविद्यात्वादत्र विस्ताराद्युद्योग इति संक्षेपः ॥ * ॥ अथ कपालाख्यजलयन्त्रमाह ।
"ताम्रपात्रमधश्छिद्रं न्यस्तं कुण्डेऽमलाम्भसि ।
षष्टिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम् ॥"
अत्र रङ्गनाथकृतटीका यथा,—
"यत् ताम्रघटितं पात्रमधश्छिद्रं अधोभागे छिद्रं यस्य तत् । अमलाम्भसि निर्म्मलं जलं विद्यते यस्मिन् तादृशे कुण्डे हृद्दृभाण्डे न्यस्तं धारितं सत् अहोरात्रे नाक्षत्राहोरात्रे षष्टिः षष्टिवारमेव न न्यूनाधिकं मज्जति । अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं भवति तत्कपालकं कपालमेव कपालकं घटखण्डानां कपालपदवाच्यत्वात् घटाद्यस्तनार्द्धाकारं यन्त्रं घटीयन्त्रं स्फुटं सूक्ष्मम् । तद्घटनन्तु ।
शुल्वस्य दिग्भिर्विहितं पलैर्यत्
षडङ्गुलोच्चं द्विगुणायतास्यम् ।
तदम्भसा षष्टिपलैः प्रपूर्य्यं
पात्रं घटार्द्धप्रतिमं घटी स्यात् ॥
सत्त्रंशमाषत्रयनिर्म्मिता या
हैम्नः शलाका चतुरङ्गुला स्यात् ।
विद्धं तया प्राक्तनमत्र पात्रं
प्रपूर्य्यते नाड़िकयाम्बुभिस्तत् ॥
तथाच सिद्धान्तशिरोमणौ,—
"घटदलरूपा घटिता घटिका ताम्री तले
पृथुच्छिद्रा ।
द्युनिशनिमज्जनमित्या भक्तं द्युनिशं घटीमानम् ॥"
"अत्र दशभिः शुल्वस्य पलैरित्यादि यद्घटी-